ॐनमःसिद्धेभ्यः॥श्रीसमयसारशास्त्र
स्यकर्तृकर्तृनिरूप्यते॥नमःसमयसाराय
स्वानुभूत्याचकासते॥चित्स्वभावायभावाय
सर्वभावांतरच्छिदे॥१॥अनंतधर्मणस्तत्त्वं
पश्यंतीप्रत्यगात्मनः॥अनेकांतमयीमूर्त्ति
र्नित्यमेवप्रकाशतां॥२॥परपरिणतिहे
तोर्मोहनाम्नोनुभावादविरतमनुभाव्य
व्याप्तिकल्माषितायाः॥ममपरमविशु
द्धिःशुद्धचिन्मात्रमूर्त्ते र्भवतुसमयसार
व्याख्ययैवानुभूतेः॥३॥ननयनयवि
रोधध्वंसिनिस्यात्पदांके॥जिनवचसि
रमंतेयेस्वयंवांतमोहाः॥सपदिसमयस
ारंतेपरंज्योतिरच्छै॥रनवमनयपक्षाक्ष
ुण्णमीक्षंतएव॥४॥व्यवहरणनयःस्या
द्यद्यपिप्राक्पदव्या॥मिहनिहितपदा

नांहंतहस्तावलंबः। तदपिपरममर्थंचिच्च
मत्कारमात्रं। परविरहितमंतःपश्यतांनै
षकिंचित्॥५॥ साईलविक्रीडितछंदः॥
एकत्वेनियतस्यशुद्धनयतोव्याप्तुर्यद
स्यात्मनः। पूर्णज्ञानघनस्यदर्शनमिह
द्रव्यांतरेभ्यःपृथक्। सम्यग्दर्शनमेत
देवनियमादात्माचतावानयंतन्मुक्त
नवतत्त्वसंततिमिमामात्मायमेकोस्तु
नः॥६॥ अनुष्टुप्छंदः॥ अतःशुद्धनयायत्तं
प्रत्यग्ज्योतिश्चकास्तितत्। नवतत्त्वगत
स्वेपियदेकत्वंनमुंचति॥७॥ मालिनीछं
दः॥ चिरमितिनवतत्त्वच्छन्नमुन्नीयमानं
कनकमिवनिमग्नंवर्णमालाकलापे।
अथसततविविक्तंदृश्यतामेकरूपं प्र
तिपदमिदमात्मज्योतिरुद्योतमानं॥८॥

उदयतिननयश्रीरस्तमेतिप्रमाणंक्वचिदपि
चनविद्मोयातिनिक्षेपचक्रं। किमपरमभिद
ध्मोधाम्निसर्वंकषेकस्मिन्ननुभवमुपयाते
भातिनद्वैतमेव॥९॥ उपजातिछंदः॥ आत्म
स्वभावंपरभावभिन्नमापूर्णमाद्यंतविमुक्त
मेकं। विलीनसंकल्पविकल्पजालंप्रकाशय
न्शुद्धनयोऽस्युदेति॥१०॥ मालिनी॥ नहिविद
धतिबद्धस्पृष्टभावादयोमीस्फुटमुपरितरंतो
व्यक्तियत्रप्रतिष्ठं। अनुभवतुतमेवद्योतमानं
समंताज्जगदपगतमोहीभूयसम्यक्स्वभा
वं॥११॥ साईलविक्रीडितं॥ नूतंभांतमभूतमे
वरभसान्निर्भिद्यबंधंसुधीर्यद्यंतः किलको
ऽप्यहोकलयत्यव्याहतमोहःस्वयं। आत्मा
नमनुभवैकगम्यमहिमाव्यक्तोयमास्तेध्रु
वंनित्यंकर्मकलंकपंकविकलोदेवःस्व

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

यंज्ञास्वतः॥१२॥ वसंततिलका॥ आत्मानुभूति
रितिशुद्धनयात्मिकायाज्ञानानुभूतिरिय
मेवकिलेतिबुध्या॥ आत्मानमात्मनिनिवि
ड्यपसुनिष्प्रकंपमेकोस्तिनित्यमवबोध्य
नःसमंतात्॥१३॥ पृथ्वीछंदः॥ अखंडितम
नाकुलंज्वलदनंतमंतर्बहिर्महःपरममस्तु
नःसहजमुद्विलासंसदा॥ चिदुल्लसननिर्भर
सकलकालमालंबतेयदेकरसमुल्लसल्ल
वणखिल्यलीलायेतं॥१४॥ अनुष्टुप्॥ए
षज्ञानघनोनित्यमात्मासिद्धिमभीप्सुभिः
साध्यसाधकभावेनद्विधैकःसमुपास्यतां
॥१५॥ दर्शनज्ञानचारित्रैस्त्रिभादेकत्वतःस्व
यंमेचकोमेचकश्चापिसममात्माप्रमाण
तः॥१६॥ दर्शनज्ञानचारित्रैस्त्रिभिःपरिणत
त्वतः॥एकोपित्रिस्वभावात्व्यवहारेणमे

चक॥१७॥ परमार्थेनतुव्यक्तज्ञातृत्वज्योतिषै
कभावः॥सर्वभावांतरध्वंसिस्वभावत्वादमेचकः
॥१८॥ आत्मनश्चिंतयैवालंमेचकामेचकत्व
योः॥दर्शनज्ञानचारित्रैःसाध्यसिद्धिर्नचान्यथा
॥१९॥ मालिनी॥ कथमपिसमुपात्तत्रित्वम
प्येकतायाश्चपतितमिदमात्मज्योतिरुच्छ
लच्चैतन्यचिक्कंन
खलुनखलुयस्मादन्यथासाध्यसिद्धिः॥२०॥
कथमपिहिलभ्यंतेभेदविज्ञानमूलाम्चलि
दमनुभूतिंयेस्वतोवान्यतोवा॥प्रतिफलन
निमग्नानंतभावस्वभावैर्मुकुरवदविकार
स्संततंस्युस्तएव॥२१॥ त्यजबुजगदिदानं
मोहमाजन्मलीढंरसयबुरसिकानांरोचनं
ज्ञानमुच्चैरुद्दहकथमपिनात्मानात्मना
साकमेकःकिलकलयतिकालेक्वापिता

दात्मवृत्तिं॥२२॥प्रथिकथमपिमृत्वातत्त्वकौ
तूहलीसन् ननुभवभवमूर्तेः पार्श्ववर्तीमुरु
र्तीष्टथगथविलसंतंस्वसमालोक्ययेनत्व
जसिमृगितिमूर्त्यासाकमेकत्वमोहं॥२३॥
साईलविक्रीडितं॥कांत्यैवस्नपयंतियेदश
दिशोधाम्नानिरुंधंतियेधामोद्दाममहस्वि
नांजनमनोमुह्नंतिरूपेणये॥दिव्येनध्व
निनासुखंश्रवणयोःसाक्षाद्वरंतोमृतं
वंद्यास्तेपुरुषाःसहस्रलक्षणधरास्तीर्थेश्वराः
सूरयः॥२४॥ आर्या॥प्राकारकवलितां
वरमुपवनराजीनिगीर्णभूमितलां॥पिबती
वहिनगरमिदंपरिखावलयेनपातालं
॥२५॥नित्यमविकारसुस्थितसर्वांगमपू
र्वसहजलावण्यं॥अक्षोभमिवसमुद्रं जि
नेंद्ररूपंपरंजयति॥२६॥साईलविक्रीडि

तं॥एकत्वंव्यवहारतोनतुपुनःकायात्मनो
र्निश्चयान्नुःस्तोत्रंव्यवहारतोस्तिवपुषःस्तु
त्यानतच्चेतनः॥स्तोत्रंनिश्चयतश्चितोभव
तिचित्स्तुत्येवसैवंभवेन्नातस्तीर्थकरस्त
वोत्तरवलादेकत्वमात्मांगयोः॥२७॥मालि
नी॥इतिपरिचिततत्त्वैरात्मकायैकतायांन
यविजनयुक्त्यात्यंतमुद्भादितायाम्॥अव
तरतिनवोधोवोधमेवाद्यकस्मत्स्वरसरभ
सकृष्टःप्रस्फुटन्नेकएव॥२८॥मालिनी॥अ
वतरतिनयावद्वृत्तिमत्यंतवेगादनवमप
रभावत्यागदृष्टांतदृष्टिःझटितिसकलभा
वैरन्यदीयैर्विमुक्तास्वयमियमनुभूतिस्त
दाविर्वभूव॥२९॥रथोद्धता॥सर्वतःस्व
रसनिर्भरभावंचेतयेस्वयमहंस्वमिहैकं
॥नास्तिनास्तिममकश्चनमोहःशुद्धचिद्

घनमहोनिधिरस्मि॥३०॥मालिनी॥इति
सतिसहसैवैरित्यन्नावैर्विवेकैस्वयमयमु
पयोगोविन्दात्मानमेकंप्रकटितपरमा
र्थैर्दर्शनज्ञानवृत्तैःकृतपरिणतिरात्माराम
एवप्रवृत्तः॥३१॥वसंततिलका॥मज्जंतुनि
र्भरमीसममेवलोकआलोकमुच्छल
तिशांतरसेसमस्ताः॥आज्ञाव्यविभ्रमति
रस्करणीभरेणपोन्मग्नएषभगवानवबो
धसिंधुः॥३२॥इतिजीवाधिकारः॥अथजीवा
जीवौएकीभूतौप्रविशतः॥साईलविक्री
डितंजीवाजीवविवेकपुष्कलदृशाप्रत्या
ययत्पार्षदानासंसारनिबद्धबंधनविधि
ध्वंसाद्विशुद्धंस्फुटत्॥आत्मारामममंत
धाममहसाध्यक्षेणनित्योदितंधीरोदा
त्तमनाकुलंविलसतिज्ञानंमनोहारयत्

त्॥३३॥मालिनी॥विरमकिमपरेणाकार्य्य
कोलाहलेनस्वयमपिनिभृतःसन्पश्यपष्ण्
मासमेकं॥हृदयसरसिपुंसःपुष्कलाच्चिन्म
धान्नोननुकिमनुपलब्धिर्भातिकिंचोपल
ब्धिः॥३४॥अनुष्टुप्॥चिच्छक्तिव्याप्तसर्वस्व
सारोजीवइयानयं॥अतोतिरिक्ताःसर्वेपि
भावाःपौद्गलिकाअमी॥३५॥मालिनी॥स
कलमविविहायाज्ञात्वाचिच्छक्तिरिक्तंसु
ष्टुतरमवगाह्यस्वंचचिच्छक्तिमात्रं॥इममु
परिचरंतंचारुविश्वस्यसाक्षात्कलयतुय
मात्मात्मानमात्मन्यनंतं॥३६॥शालिनी॥
त्वंद्यावारागमोहादयोवाभिन्नाभावाः
सर्वएवास्यपुंसः॥तेनैवांतस्तत्त्वतःपश्य
तोमीनोदृष्टाःस्युर्दृष्टमेकंपरंस्यात्॥३७॥
निर्वर्त्यतेयेनयदत्रकिंचित्तदेवतत्स्या

न्नकथंचनान्यत्र रुकोएणनिर्वृत्तमिहास्ति
कोऽपरएतिरुकंननकथंचनास्ति॥३७॥
वर्णादिसामग्र्यमिदंविदंतु निर्माणमेक
स्यहिपुद्गलस्यानतोस्त्विदंपुद्गलएवना
मायतस्सविज्ञानघनस्ततोन्यः॥३८॥अनु
ष्णुप्॥घटकुंभाभिधानेपिकुंभोघटमयो
नचेत्जीवोवर्णादिमज्जीवकल्पनेपिन
तन्मयः॥३९॥अनाद्यनंतमचलंस्वसंवे
द्यमिदंस्फुटंजीवःस्वयंकुचैतन्यमुद्भैश्च
कचकायते॥४०॥साईलविक्रीडितं॥धर्म्म
यैःसहितस्तथाविरहितोद्वैधास्त्यजीवो
यतोनामूर्त्तत्वमुपास्यपश्यतिजगज्जीव
स्यतत्त्वंततः॥इत्यालोच्यविवेचकैःसमु
चितंनाव्याप्तिमव्याप्तिमप्यपास्यव्यक्तंव्यंजि
तंजीवतत्त्वमचलंचैतन्यमालंबताम्॥

DR. BHAU DAJI

॥३॥वसंततिलका॥जीवादजीवमितिलक्ष
णतोविभिन्नंज्ञानीजनोनुभवतिस्वमनुभ
वंतं॥अज्ञानिनोनिरवधिप्रविजृंभितोयंमो
हस्त्वत्कथमहोवतनानटीति॥४२॥नान्यस्तां
तमापिनसंततिनका॥अस्मिन्ननादिम
हत्यविवेकनाट्येवर्णादिमान्नटतिपुद्ग
लएवनान्यः॥रागादिपुद्गलविकारविरुद्ध
शुद्धःचैतन्यधातुमयमूर्त्तिरयंचजीवः॥४
३॥मंदाक्रांता॥इत्थंज्ञानक्रकचदलनाघाट
नंनाटयित्वाजीवाजीवौस्फुटविघटनंनै
वयावत्प्रयातः॥विश्वंव्याप्यप्रसभविक
शाद्यक्तचिन्मात्रशक्त्याज्ञाद्वैतंस्वयम
तिरसात्तावदुच्चैश्चकाशे॥४४॥इतिश्री
जीवाधिकारः॥मंदाक्रांता॥एकःकर्त्ताचि
दहमिहमेकर्म्मकोपाद्ययोमीइत्यज्ञानो

ज्ञामयदमितःकर्त्तृकर्म्मप्रवृत्तिं॥ज्ञानज्यो
तिःस्फुरतिपरमोदात्तमत्यंतधीरंसाक्षा
न्नकुर्व्वन्निरुपधिपृथग्द्रव्यनिर्ज्जासिविश्वं
॥४६॥मालिनीपरपरिणतिमुज्झत्खंडयद्भेदवादा
निदमुदितमखंडंज्ञानमुच्चंडमुच्चैः॥ननुकथमवकाशःकर्त्तृकर्म्मप्रवृत्ते
रिहभवतिकथंवापौद्गलःकर्म्मबंधः॥
॥४७॥सार्दूलविक्रीडितंइत्येवंविरचय्य
संप्रतिपरद्रव्यान्निवृत्तिंपरंस्वंविज्ञानघ
नस्वभावमनयादास्तिघ्नुवानःपरंअ
ज्ञानोज्झितकर्त्तृकर्म्मकलनान्नैष्कर्म्म्यसं
वृत्तःस्वयंज्ञानीभूतइतश्चकास्तिजगतः
साक्षीपुराणःपुमान्॥४८॥व्याप्यव्या प
कतातदात्मनिभवेन्नेवातदात्मन्यपि
व्याप्यव्यापकभावसंभवमृतेकाकर्त्तृ

कर्म्मस्थितिः॥इत्युद्दाम विवेक घस्मर म
होभारेणनिंदस्तमोज्ञानीभूयतदासए
षनसितःकर्त्तृशून्यःपुमान्॥४९॥अग्
धरास्रंदः॥ज्ञानीजानन्नपीमांस्वपरपरण
तिंपुद्गलश्चाप्यजानन्व्याप्यव्यापकभंतः
कलयन्नुमसहौनित्यमत्यंतभेदात्अज्ञा
नात्कर्त्तृकर्म्मत्वममतिरनयोर्जीतिता
वन्नयावद्विज्ञानार्च्चिश्चकास्तिक्रमवव
द्दयंनेदमुत्पाद्यसद्यः॥५०॥आर्यायः
परिणमतिसकर्त्तायःपरिणामोभवेत्तु त
त्कर्म्मयापरिणतिःक्रियासात्रयमपिनि
ष्ठंनवस्तुतया॥५१॥एकःपरिणमतिस
दापरिणामोजायतेसदैकस्य एकस्यपरि
णतिःस्यादनेकमप्येकमेवयतः॥५२॥नौ
भोपरिणमतःखलुपरिणामोनोभयोःप्रजा

येतावन्नयोर्नयपरिणतिः स्याद्यदनेकमेक
मेवसदा॥५३॥ नैकस्यहिकर्त्तारौद्वौस्तो
द्वेकर्म्मणीनचैकस्यानेकस्यैकियेद्वेए
कमनेकंयतोनस्यात्॥५४॥ शार्दूलविक्री
डितं॥ आसंसारतएवधावतिपरंकुर्वेह
मित्युच्चकैर्दुर्वारंननुमोहिनांमिहमहाहं
काररूपंतमः॥तन्नूतार्थपरिग्रहेणविल
यंयद्येकवारंव्रजेन्नत्किंज्ञानघनस्यबंध
नमहोमूयोभवेदात्मनः॥५५॥ अनुष्टुप्॥
आत्मभावान्करोत्यात्मापरभावान्सदा
परः॥आत्मैवह्यात्मनोभावाःपरस्यपर
एवते॥५६॥ वसंततिलका॥ अज्ञानतस्तृ
णमपीहविकारकारीज्ञानंस्वयंकिलन
वन्नपिरज्यतेयः॥पीत्वादधीक्षुमधुरान्म
रसातिगर्ह्यागांदोग्धिदुग्धमिवनूतम ॥७॥

सौरसालं॥५७॥ शार्दूलविक्रीडितं॥ अज्ञाना
न्मृगतृष्णिकांजलधियाधावंतिपातुंमृगाः॥ज्ञ
ानान्नान्यमसिद्ध्यंतिमुजगाध्यासेनरज्जौजना॥
अज्ञानाच्चविकल्पचक्रकरणाद्धातोरनंगा
श्चिद्वत्तस्मृदज्ञानमयाअपिस्वयममीकर्त्री
भवंत्याकुलाः॥५८॥ वसंततिलका॥ज्ञानाद्वि
वेचकतयात्परात्मनोर्यैर्जानातिहंस
इववाःपयसोविशेषं॥चैतन्यधातुमचलं
ससदाधिरूढोजानीतएवहिकरोतिनकिंच
नापि॥५९॥ मंदाक्रांता॥ज्ञानादेवज्वलन
पयसोरौष्ण्यशैत्यव्यवस्याज्ञानादेवोद्भ
सतिलवणस्वादभेदव्युदासः॥ज्ञानादेव
स्वरसविकसन्नित्यचैतन्यधातोः क्रोधा
देश्चप्रभवतिभिदाभिंदतीकर्त्तृभावं॥६०॥
अनुष्टुप्॥ अज्ञानंज्ञानमप्येवं कुर्वन्नात्म ॥

नमंजसा॥ स्यात्कर्त्तात्मात्मभावस्यपरभाव
स्यनकश्चित्॥६१॥ आत्माज्ञानंस्वयंज्ञानंज्ञा
नादन्यत्करोतिकिं॥ परभावस्यकर्त्तात्मा
मोहोयंव्यवहारिणां॥६२॥ वसंततिलका
जीवःकरोतियदिपुद्गलकर्मनैवकस्त
र्हितत्कृतंसकलमप्यनिरंकयैव॥ एतर्हितो
ऽस्यमोहनिबर्हणायसंकीर्त्यतेश्रृणुत
पुद्गलकर्मकर्त्तृ॥६३॥ उपजातिछंदः॥
स्थितेतिविघ्नाखलुपुद्गलस्यस्वभावभू
तापरिणामशक्तिः॥तस्यांस्थितायांस
करोतिभावंयमात्मनस्तस्यसएवकर्त्ता
॥६४॥ स्थितेतिजीवस्यनिरंतरायास्वभा
वभूतापरिणामशक्तिः॥तस्यांस्थितायां ७
सकरोतिभावंयंस्वस्यतस्यैवसंवेत्सक
र्त्ता॥६५॥ आर्या॥ ज्ञानमयएवभावःकुतो ८

ऽन्यवेज्ञानिनोनपुनरन्यः॥ अज्ञानमयःसर्वः
कुतोयमज्ञानिनोन्यः॥६६॥ अनुष्टुप्॥
ज्ञानिनोज्ञाननिर्वृत्ताःसर्वेभावाभवंतिहि॥
सर्वेप्यज्ञाननिर्वृत्ताभवंत्यज्ञानिनस्तुते॥
६७॥ अज्ञानमयभावानांमज्ञानीव्याप्य
भूमिकाऽव्यकर्म्मनिमित्तानांभावानामे
तिहेतुतां॥६८॥ उपेंद्रवज्राछंदः॥ यएवमु
त्कानयपक्षपातंस्वरूपगुप्तानिवसंति
नित्यं॥ विकल्पजालच्युतशांतचित्तास्त
एवसाक्षादमृतंपिबंति॥६९॥ एकस्यबंधो
ननथापरस्यचितिद्व्योद्धावितिपक्षपाते ७
यस्तत्त्ववेदीच्युतपक्षपातस्तस्यास्तिनि
त्यंखलुचिच्चिदेव॥७०॥ वसंततिलका॥
स्वेच्छासमुच्छलदनल्पविकल्पजाला
मेवंव्यतीत्यमहतींनियपक्षकक्षां॥नंत ८

र्वहिस्समरसैकरसस्वभावंस्वभावमेक
मुपयात्यनुभूतिमात्रं॥९२॥ रथोद्धताछंद:
इंद्रजालमिदमेवमुल्लस्त्पुष्कलोच्चलवि
कल्पवीचिनिःश्यस्यविस्फुरणमेवत
त्किलाणंकृत्स्नमस्यतितदस्मिचिन्महः॥
॥९३॥ चित्स्वभावभरभावितभावाभाव
भावपरमार्थतयैकंबंधपद्धतिमपास्य
समस्तांचेतयेसमयसारमपारं॥९३॥ इ
ंद्रवज्राछंद:॥ आक्रामन्नविकल्पभा
वमचलंपदैर्नयानांविनासारोयःसम
यस्यभातिनिभृतैरास्वाद्यमानःस्वयं॥
विज्ञानैकरसःसएषभगवान्पुण्यःपुरा
णःपुमान्ज्ञानंदर्शनमप्ययंकिमथवा
यत्किंचनैःकोप्ययं॥९४॥ दूरंदूरिविक
ल्पजालगहनेभ्राम्यन्निजौघाच्युतो

रादेवविवेकनिम्नगमनान्नीत्वा जोघंव
लात्॥विज्ञानैकरसस्तदेकरसिनामात्मा
नमात्माहरन्नात्मन्येवसदागतानुगत
त्तामायात्यपयंतोयवत्॥९५॥ रथोद्धताछंद:
यःकरोतिसकरोतिकेवलंयस्तुवेत्तिस
तुवेत्तिकेवलं॥यःकरोतिनहिवेत्तिसक्व
चित्यस्तुवेत्तिसकरोतिनक्वचित्॥९६॥
अनुष्टुप्॥विकल्पकःपरंकर्त्ताविकल्प
:कर्म्मकेवलं॥नजातुकर्त्तृकर्म्मत्वंसवि
कल्पस्यनश्यति॥९७॥ उपेंद्रवज्राछंद:
ज्ञप्तिःकरोतौनहिभासतेंतःज्ञप्तौकरो
तिश्चभासतेंतःज्ञप्तिःकरोतिश्चततो॥
विभिन्नेज्ञातानकर्त्तेतितत:स्थितंच॥९
८॥ कर्त्ताकर्म्मणिनास्तिनास्तिनियतं
कर्म्मापितत्कर्त्तरिद्वंद्वंविप्रतिषिध्यतेय

ज्ञप्तिः
विभिन्ने
नत्वेन

दितदाकाकर्त्रकर्म्मस्थितिः ज्ञाताज्ञातरि
कर्म्मकर्मणिसदाव्यक्तेतिवस्तुस्थितिः
नैपथ्येवतनातटीतिरभसान्मोहस्तथा
प्येष किं ॥ ८१ ॥ अथवानानयतांतथा
पि मंदाक्रांता कर्त्राकर्त्तानभवतिय
थाकर्म्मकर्म्मापिनैवज्ञानंज्ञानंभवति
नयथापुद्गलः पुद्गलोपि ज्ञानज्योति
र्ज्वलितमचलंव्यक्तमंतस्तथोच्चै श्चिच्च
क्तीनांनिकरभरतोत्यंतगंभीरमेतत् ॥
८२ ॥ इतिसमयपदार्थपीठिकावृत्तानिसमा
प्तानि ॥ अथविलंबितेनद्यकर्म्मभुजाभुजने
दतोद्वितयतांगतमेक्यमुपानयन् ॥ ग्ल
पितनिर्भरमोहरजाभयंस्वयमुदेत्यव
बोधसुधाप्लवः ॥ ८३ ॥ मंदाक्रांता एको
दूरस्त्यक्त्वाजातिमधिरोहन्ब्राह्मणत्वाभिमानं

DR BHAU DAJI

दन्यःशूद्रःस्वयमहमितिस्नातिनित्यंतयै
वाज्ञानेप्येतौयुगपदुदरान्निर्गतौशूद्रिका
याःशूद्रौसाक्षादथचचरतोजातिभेदभ्र
मेण ॥ ८४ ॥ हेतुःस्वभावानुभवाभ्या
मेणसदाप्यभेदान्नहिकर्म्मचेदः तद्ध
र्मार्थमाश्रितमेकमिश्रंस्वयंसमस्तंखलु
बंधहेतुः ॥ ८५ ॥ कर्म्मसर्वमपिसर्व
विदोयद्बंधसाधनमुसंत्यविशेषात्ति
नसर्वमपितत्प्रतिषिद्धंज्ञानमेवविहि
तंशिवहेतुः ॥ ८६ ॥ शिखरिणी निषिद्धे
सर्वस्मिन्सुकृतदुरितेकर्म्मणिकिल
प्रवृत्तेनैःकर्म्यंनखलुमुनयःसंत्यशर
णाःतदाज्ञानेज्ञानंप्रतिचरितमेषांह
शरणंस्वयंविंदंत्येतेपरममृतंतत्र
निरताः ॥ ८७ ॥ अथैतदेवज्ञाना

त्मध्रुवमचलमाजातिमवनंशिवस्या
यंहेतुःस्वयमपियतस्तच्छिवइति॥
अतोन्यबंधस्यस्वयमपियतोबंधइ
तितत्ततोज्ञानात्मत्वंभवनमनुचू
र्हिविहितं॥६॥ अतुष्टुप्तत्तंज्ञानस्व
भावेनज्ञानस्यभवनंसदाएकइत्य
स्वभावत्वान्मोक्षहेतुस्तदेवतत्॥७॥
त्तंकर्मस्वभावेनज्ञानस्यभवनंनहि॥
इत्यंतरस्वभावत्वान्मोक्षहेतुर्नकर्म
तत्॥८॥ मोक्षहेतुतिरोधानाद्बंधत्वात्
स्वयमेवच मोक्षहेतुतिरोधायिभाव
त्वात्तन्निषिध्यते॥९॥ शार्दूलविक्री
डितं सन्मस्तत्वमिदंसमस्तमपित
त्कर्मैवमोक्षार्थिनासन्यस्तेसतिंका

किलकथापुण्यस्यपापस्यवा सम्य
क्त्वादिनिजस्वभावभवनान्मोक्षस्यहेतु
र्भवन्नैःकर्म्यप्रतिबद्धमुद्धतरसंज्ञानं
स्वयंधावति॥१०॥ यावत्याकर्म्मोपैतिक
र्म्मविरतिर्ज्ञानस्यसम्यक्तनसाकर्म्मज्ञा
नसमुच्चयोपिविहितस्तावन्नकाचित्क्षि
तिः॥११॥ किंत्वत्रापिसमुच्चयस्त्यवशतोयत्क
र्म्मबंधायतत्मोक्षायस्थितमेकमेवप
रमंज्ञानंविमुक्तंस्वतः॥१२॥ मग्नाःकर्म
नयावलंबनपराज्ञानंनजानंतियत्॥
मग्नाज्ञाननयैषिणोपिपदतिस्वच्छंदमं
दोद्यमाः॥१३॥ विश्वस्योपरितैरंतिसततंज्ञा
नंनवंतःस्वयंयेकुर्वंतिनकर्म्मजातुन
वशंयांतिप्रमादस्यच॥१४॥ मंदाक्रां
तानेदोन्मादंभ्रमरसभरान्नाटयत्यी
दृमोहंमूलोन्मूलंसकलमपितत्कर्म

कृत्वावलेनाहेलोन्मीलित्परमकल
याज्ञार्द्धमारब्धकेलिज्ञानज्योतिःकव
लिततमःपुञ्जत्वेनैरेकाकारमेकमेवा
यान्तरूपेणद्विपात्रीभूतमेकपात्रीभू
यनिष्क्रान्तःअथप्रविशतिआस्रवः
द्भुतविलंबितछंदः अथमहामहनिर्भ
रमंथरंसमररंगपरागतमास्रवंअय
मुदारगंभीरमहोदयोज्ञमतिर्दुर्जयवी
र्यधनुर्द्धरः॥ इतिज्ञानीनिरास्रवोज्ञानी
द्वैर्विनायोजनिष्पन्नस्यात्ज्ञानमेवैक
बंधनंसर्वान्यकर्म्मास्रवौघानां
मोभावःसर्वभावास्रवाणां॥
भावास्रवाभावमयंप्रपन्नोऽद्रव्यास्रवे
भ्यःस्वतएवभिन्नःज्ञानीसदाज्ञानम
यैकभावोनिरास्रवोज्ञायकएकएव

ज्ञार्द्धविक्रीडितं॥सन्यस्यन्नि
जबुद्धिपूर्वमनिशंरागंसमग्रंस्वयंवारं
वारमबुद्धिपूर्वमपितंजेतुंस्वशक्तिंस्पृश
न्नुच्छिंदन्परवृत्तिमेवसकलांज्ञानस्य
पूरोनिरास्रवोज्ञानमात्मानित्यनिरास्रवोनवति
हिज्ञानीयदास्यात्तदा॥ अनुष्टुप्
सर्वस्यामेवजीवंत्यांद्रव्यप्रत्ययसंततौ
कुतोनिरास्रवोज्ञानीनित्यमेवेतिचेन्म
तिः॥ मालिनीवेज्ञहतिनहिसत्तांप्रत्य
यापूर्वकाःसममनुसरंतोयद्यपि
द्रव्यरूपाःतदपिसकलरागद्वेषमोह
मुदासादयतिनजातुज्ञानिनःकर्म
बंधः॥ अनुष्टुप्रागद्वेषविमोहा
नांज्ञानिनोयदसंभवःततएवनबंधो
स्यतेहिबंधस्यकारणं॥ वसंततिल

काछंदः॥अथास्यमुद्धनयमुद्धतवो
धचिह्नमेकाग्यमेवकलयंतिसदेवये
तेरागादिमुक्तमनसासततंभवंतः॥
पश्यंतिबंधविधुरंसमयस्यसारं॥१०१
प्रच्युत्यशुद्धनयतःपुनरेवयेतेरागा
दियोगमुपयांतिविमुक्तबोधाः॥तेक
र्मबंधमिहविभ्रतिपूर्वबद्धव्याश्रवै
रुतविचित्रविकल्पजालं॥१०२॥अ
नुष्टुप्॥इदमेवात्रतात्पर्यंहेयःशुद्ध
योनहि॥नास्तिबंधस्तदज्ञानात्तत्त्यागा
द्बंधएवहि॥१०३॥शार्दूलविक्रीडितं॥धी
रोदारमहिम्यनादिनिधनेबोधेनिबद्ध
न्नधतित्याज्यःशुद्धनयोनजातुकृतिभिः
सर्वंकषःकर्म्मणांतत्रस्थास्नुमरीचि
चक्रमचिरात्संहृत्यनिर्यद्बहिःपूर्ण

ज्ञानघनौघमेकमचलंपरंपनिश्चांतंमहः
॥१०४॥मंदाक्रांता॥रागाद्दीनांमूलमिति विज्ञा
यमात्सर्वतोप्याश्रवाणांनित्योद्योतंकि
मपिपरंवस्तुसंपश्यतोंतःस्फारःस्फार
स्वरसविसरैःप्लावयन्सर्वभावा॥तालोकां
तादचलमतुलंज्ञानमुन्मग्नमेतत्॥१०५॥
इत्याश्रवोयंनिष्क्रांतः॥अथसंवरःप्रवि
शति॥शार्दूलविक्रीडितं॥आसंसारविरो
धिसंवरजुषैकांतावलिप्ताश्रवन्य
क्कारात्प्रतिलब्धनित्यविजयंसंपाद्य
संवरंव्याहत्यंपररूपतोनिमितंस
म्यक्स्वरूपेस्फुरज्ज्योतिश्चिन्मयमु
ज्ज्वलंनिजरसप्राग्भारमुज्जृंभते॥१०६॥
चैरूप्यंजडरूपतांचबधतोःकृत्वावि
नाशंद्वयोरंतर्दारुणदारुणेनपरतो

ज्ञानस्यरागस्यच॥नेदज्ञानमुदेतिनिर्म्मल
मिदंमोदध्वमध्वासिताःशुद्धज्ञानघनौघमे
कमधनासंतोद्वितीयच्युताः॥१०७॥मासि
नीबंदःयदिकथमपिधारावाहिनाबोध
नेनअ्रवमुपलभमानःशुद्धमात्मानमा
स्तिनदयमुदयदात्मारामंमात्मानमात्मा
परपरिणतिरोधान्शुद्धमेवाभ्युपैति॥१०
८॥निजमहिमरतानांनेदविज्ञानशक्ति
नवतिनियतमेषांशुद्धतत्त्वोपलंभः॥अ्र
चलितमखिलान्यद्रव्यदूरेस्थितानांनव
तिसतिचतस्मिन्नक्षयःकर्म्ममोक्षः॥१०९
॥ संपद्यतेसंवरएषसाक्षात्शुद्ध
मतत्त्वस्यकिलोपलंभात्सनेदविज्ञान
नएवतस्मात्नेदविज्ञानमतीवभाव्यम्॥
११०॥अनुष्टुप्॥भावयेनेदविज्ञानमिद

मच्छिन्नधारया॥तावद्यावत्पराच्च्युत्वाज्ञानंज्ञा
नेप्रतिष्ठते॥१११॥नेदविज्ञानतःसिद्धाःसि
द्धयेकिलकेचनात्रास्यैवाभावतोबद्धा
बध्येकिलकेचन॥११२॥मंदाक्रांताःनेद
ज्ञानोच्छलनकलनाच्छुद्धतत्त्वोपलंभात्
रागग्रामप्रलयकरणात्कर्म्मणांसंवरेण
॥विभ्रत्तोषंपरममम्लानालोकमम्लानमे
कंज्ञानंज्ञानेनियतमुदितंज्ञाप्यतोद्योतमे
तत्॥११३॥इतिसंवरोनिःक्रांतः॥अथनिर्जरा
यास्वरूपकथनं॥शार्दूलविक्रीडितंरागा
द्याश्रवरोधतोनिजधराबंधत्वापरःसंवरःक
र्म्मागामिसमस्तमेवकरतोदूरान्निरुंधन्
स्थितः॥प्राग्बद्धंतुतदेवदग्धुमधनाभा
जंतेनिर्जरयाज्ञानज्योतिरपाकृतंनहियते
रागादिनिमूर्छितं॥११४॥अनुष्टुप्॥तदज्ञान

स्येवसामर्थ्यविरागस्यैववाकिलायकोपि
कर्मभिःकर्मभुंजानोपिनबध्यते॥११५॥
२योऽतीतानास्तुतेविषयसेवनेपियत्स्वयं
लंविषयसेवनस्यनाज्ञानवैभवंबलात्
विरागतासेवकोपितदसावसेवकः॥११६
मंदाक्रांतासम्यग्दृष्टेर्भवतिनियतंज्ञान
वैराग्यशक्तिःस्वंवस्तुत्वंकलयितुमयं
स्वान्यस्यस्पष्टमित्वा॥यस्माद्ज्ञात्वाव्यति
करमिदंतत्त्वतःस्वंपरंचस्वस्मिन्नास्तेवि
रमतिपरात्सर्वतोरागयोगात्॥११७॥
सम्यग्दृष्टिःस्वयमयमहंजातुबंधोनमे
स्यादित्युत्तानोत्पुलकवदनारागिणोप्या
चरंश्चाज्ञालंबंतांसमितिपरतांतेयतोद्य
पिपायात्प्रात्मानात्मावगमविरहात्सं
तिसम्यक्करिक्ताः॥११८॥आसंसारात्प्र

तिपदममीरागिणोनित्यमत्ताःसुप्तायस्मि
न्पदमपदंतद्धिबुध्यध्वमंधाः॥एतैतेतः
पदमिदमिदंयत्रचैतन्यधातुःशुद्धःशुद्धः
स्वरसभरतःस्थायिभावत्वमेति॥११९॥अ
नुष्टुप्॥एकमेवहिनद्यस्वाद्यंविपदामपदं
यंजपदान्येवनासंतेपदान्यपानियत्पुरः
॥१२०॥ब्रह्माईलविक्रीडितं॥एकज्ञायकभा
वनिर्भरमहास्वादंसमासादयन्स्वादंद्यं
द्यमयंविधातुमसहःस्वंवस्तुवृत्तिंविदन्
प्रात्मॉन्नुज॥वानुभावविवशोन्नस्यद्धिरो
धोदयंसामान्यंकलयत्किलैषसकलं
ज्ञानंनयत्येकतां॥१२१॥ब्रह्माईलविक्रीडि
तं॥अज्ञानाःस्वयमुज्वलंतियदिमाःसंवे
दनयत्कयोनिष्पीताखिलभावमंडलर
सप्राग्भारमत्ताइवयस्यान्निन्नसंः सए

ज्ञानगवानेकोप्यनेकीभवत्वलात्पुकलि
कानिरुद्धुतनिधिश्चैतन्यरत्नाकरः॥१२२॥
लिङ्गंतांस्वममेवदुष्करतरैर्मोक्षोन्मुखैः
कर्म्मभिःलिङ्गंतांचपरैर्महाव्रततैर्नारेण तवो
नग्नाश्चिरं साक्षान्मोक्षमिदंनिरामयप
दंसंवेद्यमानःस्वयंज्ञानंज्ञानगुणंविना
कथमपिहाधुंज्ञमंतेनहि॥१२३॥ धुतविलं विते॥
पदमिदंननुकर्म्मदुरासदंसहजबोधकला ।
सुजनंकिलातताइदंनिजबोधकलावल ।
त्कलयितुंयततांसततंजगत्॥१२४॥
अचिंत्यशक्तिःस्वयमेवदेवश्चिन्म ।
यचिंतामणिरेषयस्मात्सर्वार्थसिद्ध
मतयाविधत्तेज्ञानीकिमन्यस्यपरिग्रहे
ण॥१२५॥वसंततिलकाइदंपरिग्रहम
पास्यसमस्तमेवसामान्यतःस्वपरयो २६

रविवेकहेतुं॥ अज्ञानमुज्झितुमनाअकृताविशे
षान्भूयस्तमेवपरिहर्तुमयंप्रवृत्तः॥१२६॥ स्व ।
गताक्रांतः पूर्ववद्दनिजकर्म्मविपाकात्ज्ञानि
नोयदिभवत्युपभोगः॥ तद्भवत्यत्रागवियो
गान्नूनमेतिनपरिग्रहभावं॥१२७॥ वेद्यवे
दकविभावच्चलत्वाद्धियतेनखलुकांक्षितमे
वंतेनकांक्षतिनकिंचनविद्वान्सर्वतोप्यति
विरक्तिमुपैति॥१२८॥ ज्ञानिनोनहिपरिग्रह
भावंकर्म्मरागरसरिक्ततयेति॥ रंग युक्तिर
कषायितवस्त्रेत्वक्तीवहिवहिर्लुठतीह॥
१२९॥ ज्ञानवान्स्वरसतोपियतःस्यात्सर्व
रागरसवर्जनशीलः॥ लिप्यतेसकलकर्म
निरेवकर्म्ममध्यपतितोपितनोन॥१३०॥
ज्ञाईलविक्रीडितंयादृक्तादृगिहास्तितस्य
वशतोयस्यस्वभावोहियः॥ कर्तुंनैवकथंच

नापिहिंसारेरन्याद्दृष्टःश्रूयतेअज्ञानंनक
दाचनापिहिभवेज्ज्ञानं भवन्संततं।ज्ञानि
नमुंक्वपरापराधजनितोनास्तीहवंधस्तव
॥१२१॥ज्ञानिनकर्म्मनजातुकर्त्तुमुचितंकि
ंचित्तथाप्युच्यतेमुंक्तेहंतनजातुमेयदिपरंतु
मुक्तएवासिनो॥बंधःस्यादुपभोगतोयदि
नतत्किंकामचारोस्तितेज्ञानंसन्वसवं
धमेष्वपरथास्वस्यापराधात्ध्रुवं॥१२२॥
कर्त्तारंस्वफलेनयत्किलबलात्कर्मैवि
नायोजयेत्।कुर्वाणःफलनिप्सुरेवहिफ
लंप्राप्नोतियत्कर्म्मणःज्ञानंसंस्तदपास्त
रागरचनोनोबध्यतेकर्म्मणा।कुर्वाणोपि
हिकर्म्मतत्फलपरित्यागैकशीलोमुनि
॥१२३॥त्यक्त्वेत्यंकर्मसकलंसकर्मकुरुतेनेति
यतीभवेत्यंकिंबतेस्यापिकुतोपिकिंचिदपि

DR BHAU DAJI

तत्कर्मावसेनापतेत्।तस्मिन्नापतितेबकंप
रमज्ञानस्वभावस्थितोज्ञानीकिंकुरुतेथ
किन्नकुरुतेकर्मेतिजानातिक॥१२४॥स
म्यग्दृष्टयएवसाहसमिदंकर्तुंक्षमंतेपरंथ
द्रुत्रेपिपतत्यमीनियतलंलोकंमुक्ताध्वनि
सर्वभावनिसर्गनिर्भरतमाशंकांविहायस्व
यंजानंतःस्वमवध्यबोधवपुषंबोधाच्चयंते
नहि॥१२५॥लोकःशाश्वतएकएवसकल
व्यक्तोविविक्तात्मनश्चिल्लोकंस्वयमेवकेव
लमयंयस्त्वेकमत्येककः।लोकोयंनतवा
परस्तदपरस्तस्यास्तितद्भीःकुतोनिःशंक
सततंस्वयंसहजंज्ञानंसदाविंदति॥१
२६॥एवंकैवहिवेदनायदचलंज्ञानंस्वयं
विद्यतेनिर्भेदोदितवेद्यवेदकबलादेकंस
दानाकुलैःनैवान्यागतवेदनैवमवेत्तूर्नाः

कःसततंस्वयंससहजंज्ञानंसदाविंदति॥
१४१॥ एकंज्ञानमनाद्यनंतमचलंसिद्धिं
लेतत्स्वतोयावत्तावदिदंसदेवहिनवेन्ना
त्रद्वितीयोदयःतन्नाकस्मिकमत्रकिंचनन
वेतद्धीःकुतोज्ञानिनोनिःशंकःसततंस्वयंस
सहजंज्ञानंसदाविंदति॥१४२॥ मंदाक्रांता
टंकोत्कीर्णस्वरसनिचितज्ञानसर्वस्वभाज
ःसम्यग्दृष्टेर्यदिहसकलंस्यंतिलस्माल्लि
कर्म॥तत्तस्मात्सिन्मुरविमनाकर्कर्मणो
नास्तिबंधःपूर्वेमोक्षंतदनुभवतोनिश्चितं
निर्जरैव॥१४३॥ रुंधन्बंधंनवमितिनिजै
ःसंगतोष्टाभिरंगैःप्राग्बद्धंस्वयमुपनय
न्निर्नीरोकुंजणेणःसम्यग्दृष्टिःस्वयमति
रभसादिमध्वांतमुत्कंज्ञानंभूत्वानटतिग
गनाभोगरंगंविगाह्य॥१४४॥ इतिनिर्जरानिःशं

कुतोज्ञानिनोनिःशंकःसततंस्वयंससहजं
ज्ञानंसदाविंदति॥१३७॥ यत्सन्नाशमु
पैतिनन्नियतंव्यक्तेनिवस्तुस्थितिःज्ञा
नंसत्स्वयमेवतत्किलततस्त्रातंकिमस्य॥
परैः॥ अस्मात्राणमतोनकिंचननवेतद्धीःकु
तोज्ञानिनोनिःशंकःसततंस्वयंससहजंज्ञा
नंसदाविंदति॥१३८॥ स्वंरूपंकिलवस्तुने॥
स्तिपरमागुप्तिःस्वरूपेनयत्कश्चनःकोपिप
रःप्रवेष्टुमकृतंज्ञानंस्वरूपंचनु॥ अस्याः
गुप्तिरतोनकाचनभवेत्तद्धीःकुतोज्ञानिनो
निःशंकःसततंस्वयंससहजंज्ञानंसदाविं
दति॥१३९॥ प्राणोच्छेदमुदाहरंतिमरणंप्रा
णाःकिलास्यात्मनोज्ञानंतत्स्वयमेवशा
श्वततयानोच्छिद्यतेजातुचित्तन्नास्तोमर
णंतकिंचनभवेत्तद्धीःकुतोज्ञानिनोनिःशं

ना॥ शार्दूलविक्रीडितंरागोद्गारमहारसेनस
कलंकृत्वाप्रमत्तंजगत्क्रीडंतंरसभावनि
र्भरमहानाटयेनबंधुनटयन्॥आनंदामृतनि
ष्पीज्यसहजावस्थांस्फुटंनाटयद्धीरोदा
त्तमनाकुलंनिरूपधिज्ञानंसमुन्मज्जति॥१४
५॥ इंद्रवज्राछंदः॥नकर्मबद्धंजगन्नचलना
त्मकंकर्मबानानैककरणानिनानाचिद
चिद्भावोबंधकृत्यदैक्यमुपयोगभूंसमुप
यातिरागादिनिःसएवकिलकेवलंनबंधं
बंधहेतुर्नृणाम्॥१४६॥शार्दूलविक्रीडितं॥
लोकःकर्मततोस्तुसोस्तुचयस्मिंदात्म
कंकर्मतन्नात्यस्मिन्करणानिसंतुचिद
चिद्व्यापादनंवास्तुतत्॥रागादीनुपयो
गभूमिमनयन्ज्ञानंभवन्केवलंबंधं
नैवकृतोप्युपैत्ययमहोसम्यग्दृगात्मा॥

ध्रुवं॥१४७॥इंद्रवज्राछंदनआपिननिरर्गलंचरि
त्रमिष्यतेज्ञानिनांतदायतनमेवसाकिल
निरर्गलाव्याहतिः॥अकामकृतकर्मत
न्मतमकारणंज्ञानिनोह्यंतनहिविरुध्य
तेकिमुकरोतिजानातिच॥१४८॥जानाति
यःसनकरोतिकरोतियस्तुजानात्ययंन
खलुतत्किलकर्मरागः॥रागंत्वबोधम
यमध्यवसायमाकृर्मिथ्यादृशःसनियत
सबंधहेतुः॥१४९॥सर्वंसदैवनियतंभ
वतिस्वकीयकमेदियान्मरणजीवितदुः
खसौख्यं॥अज्ञानमेतदधिगम्यपरात्परस्य
पश्यंतिये मरणजीवितदुःखसौख्यं॥
॥१५०॥ अज्ञानमेतदधिगम्यपरात्परस्य
पश्यंतिये मरणजीवितदुःखसौख्यं॥
र्माण्ययंस्फुरतिरेनविकीर्यवस्तेमिथ्या

दृश्यो नियतमात्मा नोभवति ॥२५१॥ अनुष्टु
प् मिथ्यादृष्टिः सएवास्यबंधहेतुर्विनिश्च
यात् सएवाध्यवसायोयमज्ञानात्मास्प
दृश्यते ॥२५२॥ अनेनाध्यवसायेननिःक
लेनविमोहितः नकिंचनापिनैवास्तिना
त्मात्मानंकरोतियत् ॥२५३॥
विश्वाद्विभक्तोपिहियत्स्वभावादात्मान
मात्माविदधातिविश्वं मोहैककंदोध्य
वसायएषनास्तीहयेषांयतयस्तएव
॥२५४॥ ज्ञाईलविक्रीडितं सर्वत्राध्यव
सानमेवमखिलंत्याज्यंयदुक्तंजिनैस्त
न्मन्येव्यवहारएवनिखिलोप्यन्याश्र
यस्माज्जितः सम्यग्निश्चयमेकमेवत
दमी निःकंपमाक्रम्यकिंमु रूढा नय
नेमहिम्निनिजेवभांतिसंतोधृतिं ॥

५५॥ रागादयोबंधनिदानमुक्ता
स्तिश्चिन्मात्रमहोतिरिक्ताः आत्माप
रोवाकिमुतन्निमित्तमितिप्रणुन्नाःपुन
रेवमाहुः ॥२५६॥ नजातुरागादिनिमित्त
भावमात्मात्मनोयातियथार्ककांतः
तस्मिन्निमित्तंपरसंगएववस्तुस्वभावे
मुदेतितावत् ॥२५७॥ अनुष्टुप् इति
वस्तुस्वभावंस्वंतानीजानातितेनसः
रागादीनात्मनःकुर्यान्नातोभवतिका
रकः ॥२५८॥ इतिवस्तुस्वभावंस्वंनाज्ञा
नीवेत्तितेनसः रागादीनात्मनःकुर्या
दतोभवतिकारकः ॥२५९॥ ज्ञाईलविक्री
डितं हत्वालोभ्यविवेच्यतत्किलपरद्र
व्यंसमग्रंबलात्तन्मूलांवहुभावसंत
तिमिमांमुहुर्तुकामःसमं आत्मानंसमु

पैतिनिर्भरखरदृत्पूर्णैकसंविद्युतः येनो
न्मूलितबंधएषभगवानात्मात्मनिस्म
र्जितिः॥१६०॥मंदाक्रांतारागादीनामुद
यमदयंदारयत्कारणानांकार्यंबंधवि
विधमधनासद्यएवप्रणुद्यःज्ञानज्योतिः
क्षपितततिमिरंसाधुसन्नद्धमेतत्तद्यद्य
दत्यसरमपरःकोपिनास्याद्दणोति॥१६
१॥इतिबंधानिःक्रांतः॥अथप्रविशतिमो
क्षः॥ज्ञानविलासवर्णनं॥शिखरिणी॥
द्विधाकृत्वप्रज्ञाक्रकचदलनाद्बंधपुरु
षौनयन्मोक्षंसाक्षात्पुरुषमुपलंभैकनि
यतंइदानीमुन्मज्जत्सहजपरमानंद
सरसंपरंपूर्णंज्ञानंकृतसकलकृत्यंवि
जयते॥१६२॥मंदाक्रांताप्रज्ञाछेत्रीयि
तेयंकथमपिनिपुणैःपातिनासावधा

नैःसूक्ष्मेंतःसंधिबंधेनिपतितरभसादात्म
कर्मेनियस्यत्रात्मानंमग्नमंतःस्थिरवि
शदलसद्बोधचैतन्यपूरेबंधाज्ञानन्ना
वेनियमितमनितःकुर्वतीभिन्नभिन्नौ
॥१६३॥शार्दूलविक्रीडितंभित्वासर्वम
पिस्वलक्षणबलाज्ज्ञेतुंह्यियच्चकचतेचिन्मु
शंकितनिर्विभागमहिमाशुद्धश्चिदेवा
स्म्यहं॥निद्यंतेयदिकारकाणियदिवाध
र्मागुणावायदिनिद्यंतांनिदास्तिकाच
नविनौभावेविशुद्धेचितिः॥अथै
तापिहिचेतनाजगदिचेत्दृक्ज्ञप्तिरस्मै
त्यजेत्तत्सामान्यविशेषरूपविरहान्
सास्तित्वमेवत्यजेत्॥तस्यागेचेतोपिज
डंतांभवतिव्याप्योविनाव्यापकात्मा
चैतमुपैतितेननियतंदृक्ज्ञप्तिरूपास्तु

क्षेत्र॥१६५॥ इंद्रवज्रा॥ एकश्चितश्चिन्मय
एवभावोभावाःपरेयेकिलतेपरेषाम्॥
ग्राह्यस्ततश्चिन्मयएवभावोभावाःपरे
सर्वतएवहेयाः॥१६६॥शार्दूलविक्रीडि
तं॥सिद्धांतोयमुदात्तचित्तचरितैर्मोक्षार्थि
भिःसेव्यतांशुद्धंचिन्मयमेकमेवपरमं
ज्योतिःसदैवास्म्यहं॥एतेयेत्वनुसमुच्छ्वसं
तिविविधाभावाःपृथक्लक्षणास्तेहं
नास्मियतोत्रतेममपरद्रव्यंसमग्राण्य
पि॥१६७॥अनुष्टुप्॥परद्रव्यमहंकुर्वन्
बध्येनैवापराधवान्॥बध्येतानपरा
धोनस्वद्रव्येसंवृतोयति॥१६८॥मंद
अनवरतमनंतैर्बध्यतेसापराधोऽय
तिनिरपराधोबंधनैर्जातुनिमत
मयमशुद्धस्वभावान्सापराधोनभवतिनि

DR. BHAU DAJI

रपराधःसाधुश्शुद्धात्मसेवी॥१६९॥पृथ्वीछंद
अतोहताःप्रमादिनोगताःसुखासीनता
प्रलीनंचापलमुन्मीलितमालंबनमात्म
नेवालानितंचचित्तमासंपूर्णविज्ञानघ
नोपलब्धेः॥१७०॥वसंततिलकायत्रप्रति
क्रमणमेवविषंप्रणीतंतत्राप्रतिक्रमण
मेवसुधाकुटःस्यात्तत्किंप्रमाद्यतिजनः
पतन्नधोधःकिनुहीहमूर्द्धमधिरोहति
निःप्रमादः॥१७१॥पृथ्वीप्रमादकलितः
कथंनभवतिशुद्धभावोल्लसःकषायभर
गौरवादलसताप्रमादोयतः॥अतःस्व
रसनिर्भरेनियमितःस्वभावेभवमुनिः
परमशुद्धतांव्रजतिमुच्यतेवाचिरात्॥
॥१७२॥शार्दूलविक्रीडितं॥इत्थंज्ञानक्रियाशुद्धि
धायिनित्यंविलसपरद्रव्यसंमप्रंस्वयंस्वद्र

मेरतिमेतियःसनियतंसर्वापराधःशु
तःबंधध्वंसमुपेत्यनित्यमुदितःस्वज्यो
तिरछोछलत्चैतन्यामृतपूरपूर्णमहि
मानुभवोनवमुच्यते॥१७३॥मंदाक्रांता
बंधछेदात्कलयदतुलंमोक्षमक्षय्यमेत
त्नित्योद्योतस्फुटितसहजावस्थमेकं
तशुद्धं॥एकाग्राग्रस्वरसभरतोत्यंतगंभी
रधीरंपूर्णज्ञानंज्वलितमचलंस्वस्यली
नंमहिम्नि॥१७४॥इतिनिः कांक्षितांगः॥
शार्दूलविक्रीडितं॥नीत्वासम्यक्प्रलय
मखिलान्कर्तृभोक्तृादिभावान्दूरीभूतः
प्रतिपदमयंबंधमोक्षप्रक्रमेभ्यः शुद्धः
स्वरसविसरापूर्णपुण्याचलार्चिश्चकां
स्कीर्णप्रगटमहिमास्फूर्जतिज्ञानपुंजः
॥१७५॥अनुष्टुप्कर्तृबंधंस्वभावोस्यचि २३

नोवेदयितृत्ववत्॥अज्ञानादेवकर्तायंतदभा
वादकारकः॥१७६॥शिखरिणी॥अकर्तृजी
वोयंस्थितइतिविशुद्धःस्वरसतःस्फुरच्चिद्रू
पिन्निर्भ्भरितसुखनाभोगनिवनः॥तथाप्यस्यासौ
स्याद्यदिहकिलबंधःप्रकृतिनिःसरवस्त्वता
नस्यस्फुरतिमहिमाकोपिगहनः॥१७७॥अनु
ष्टुप्भोक्तृत्वंनस्वभावोस्यसमतःकर्तृवत्
स्थितः॥अज्ञानादेवभोक्तायंतदभावादवे
दकः॥१७८॥शार्दूलविक्रीडितं॥अज्ञानीप्र
कृतिस्वभावनियतोनित्यंभवेद्वेदको ज्ञानी
पुप्रकृतिस्वभावविरतोनोजातुविद्वेदकः॥
इत्येवंनियमंनिरूप्यनिपुणैरज्ञानतात्यज्य
तांशुद्धैकात्ममयेमहस्यचलितैरासेव्यतां
ज्ञानता॥१७९॥वसंततिलका॥ज्ञानीकरो
तिनवेदयतेचकर्मजानातिकेवलमयंकि

लतत्स्वभावं जानत्परंकरणवेदनयोरभावा
त्कुर्वस्वभावनियतः सन्मुक्त एव ॥१८०॥ अ
नुष्टुप् ॥ येतु कर्तारमात्मानंपश्यंतितमसात
नाः सामान्यजनवत्तेषांनमोक्षोपिमुमुक्षतां
॥१८१॥ नास्तिसर्वोपिसंबंधः परद्रव्यात्मत
त्त्वयोः कर्तृकर्मस्वसंबंधाभावेतत्कर्तृतानु
नः ॥१८२॥ वसंततिलकाएकस्यवस्तुनइहा
न्यतरेणसाईंसंबंधएवसकलोपियतोनि
षिद्धः तत्कर्तृकर्मघटनास्तिनवस्तुनेदेय
रूपंत्वकर्तृमुनयश्चजनाश्चतत्त्वं ॥१८३॥ येतु
स्वभावनियमंकलयंतिनेमंज्ञानंभ्रमः
महसोवततेवराकाः कुर्वंतिकर्मततएवहि
भावकर्मकर्तास्वयंभवतिचेतनएवनान्यः
॥१८४॥ शार्दूलविक्रीडितं कार्यत्वादकृतं
नकर्मनचतज्जीवप्रकृत्योर्द्वयोरज्ञायाः ज्ञ २५

कृतेःस्वकार्यफलमुज्झनभावानुषंगात्कृतिः नैक
स्याःपुंसःप्रकृतेः प्रक्षित्वत्सनाड्यावेस्यकर्त्तीतती
जीवस्यैवचकर्मतच्चिदनुगंज्ञातानयत्पुद्गला
॥१८५॥ शार्दूलविक्रीडितं कर्मैवप्रवितर्क्य
कर्तृहतकैः क्षित्वात्मनः कर्तृनांकर्तारंमेपक
विदेत्यचलिताकैश्चितश्चकृतिःकोपिता तेषा
मुद्धतमोहमुद्रितधियांबोधस्यसंशुद्धये स्या
द्वादप्रतिबंधलब्धविजयावस्तुस्थितिःस्तूय
ते ॥१८६॥ माकर्तारममीस्पृशंतुपुरुषंसांख्या
श्चबाह्यार्हताःकर्तारंकलयंतुतंकिलसदाजै
नाबोधाश्रयाःकृर्द्दरूद्धतबोधधामनियतंप्र
त्यक्षमेनंस्वयंपश्यंतुच्युतकर्तृभावमचलं
ज्ञातारमेकंपरं ॥१८७॥ मालिनीछंदसिकमिद
मिहैकः कल्पयित्वात्मतत्त्वंनिजमनसिवि
धत्तेकर्तृजोक्तोविनोदं अपहरतिविमोहंत

स्पनित्यामृतौघैः स्वममयमनिर्भिंद्य चित्
चमत्कारेणैव ॥१८८॥ अनुष्टुप्॥ इत्यंशानेद
तोत्पंतंदृष्टिमनाश्रित्य कल्पनात्रयात्मकरो
तिमुक्तेत्पद्येकांतश्चकास्तु मा ॥१८९॥ शा
र्दूलविक्रीडितं॥ आत्मानंपरिशुद्धिमीप्सुरति
व्याप्तिंपदार्थांधकैः कालोपाधिबलाद
शुद्धिमधिकांतत्रापिमत्वापरैः। चैतन्यंक्षणि
कंप्रकल्पयद्युकैः शुद्धर्जसत्रेरतैरात्मा शुचि
तानघहारवद्दहोनिःसूत्रमुक्तेक्षिभिः ॥१९०॥
कर्तुर्विदयितुश्च युक्तिवसतोर्नेदोस्तनेदोपि
वाकर्त्ताविदयिताच्चमाज्ञवशुवावस्त्वेवसंवि
त्पतां। श्रोतासूत्रइवात्मनीहनिपुणैःनर्तुनि
र्नाट्यवत्कविचिच्चिंतामणिमालकेयमनि
तोप्येकाचकास्त्वेवनः ॥१९१॥ स्योद्गताव्या व
हारिकदृशैवकेवलंकर्तृकर्मचविनिर्मुक्तं

प्यतेनिश्चयेनयदिवस्तुचिंत्यतेकर्तृकर्म्मध
सदैकमिष्यते ॥१९२॥ पृथ्वीछंदः॥ वहिर्लुठति
यद्यपिस्फुरदनंतशक्तिःस्वयंतथाप्यपरस्व
रूपनोविशतिवस्तुनान्यंपरं स्वभावनियतं
यतःसकलमेववस्त्विष्यतेस्वभावचलनाकु
लःकिमिहमोहितःक्लिश्यते ॥१९३॥
वस्तुचैकमिहनान्यवस्तुनोयेनतेनखलुव
स्तुवस्तुतत्निश्चयोयमपरोमरस्यकः किं
करोतिहिवहिर्लुठन्नपि ॥१९४॥ यत्तुवस्तुरू
पतेत्यवस्तुनःकिंचनापिपरिणामिनःस्वयं
व्यावहारिकदृशोक्षन्मतंनान्यदस्तिकिमपी
हनिश्चयात् ॥१९५॥ शार्दूलविक्रीडितं शुद्ध
द्रव्यनिरूपणार्पितमतेस्तत्वंसमुत्पद्यतेनै
कद्रव्यगतंचकास्तिकिमपिद्रव्यांतरंजातु
चित् ज्ञानंज्ञेयमनेतियत्तुतदयंशुद्धस्वभा

वोदयः किंऽऽमंतरचुंबनाकुलधियः तत्त्व
च्चवंतेजनाः॥१९६॥ मंदाक्रांताः शुद्धऽऽत्म
स्वरसभवनात्किंस्वभावोस्यबोधं मन्यद्रूपं
भवतियदिवातस्यकिंस्यात्स्वभावः ज्योत्स्ना
रूपंस्नपयतिभुवंनैवतस्यास्तिभूमिर्ज्ञानं
ज्ञेयंकलयतिसदाज्ञेयमस्यास्तिनैव॥१९७॥
रागद्वेषद्वयमुदयतेतावदेतन्मयावज्ज्ञानं
ज्ञानंभवतिनपुनर्वेधितांयातिबोधेज्ञानंज्ञा
नंभवतुदिदंन्यक्कृताज्ञानभावंभावोभावो
भवतितिरयन्नेनपूर्णस्वभावः॥१९८॥ राग
द्वेषौविरहिभवतिज्ञातमज्ञानभावात्तौवस्तु
प्रणिहितदृशाद्दृश्यमानौनकिंचित् सम्यग्दृ
ष्टिः क्षिपतिस्फुटंतस्त्वदृष्ट्यास्फुटंतौज्ञानज्यो
तिर्ज्वलतिसहजंयेनपूर्णाचलार्चिः॥१९९॥ शालिनी
रागद्वेषोत्पादकंतत्त्वदृष्ट्यानान्यद्रूपंवीक्ष्यते ॥२६॥

किंचनापिःसर्वऽऽत्मोत्पत्तिरंतश्चकास्तिंव्य
क्तायंतंस्वस्वभावेनयस्मात्॥२००॥ मालि
नीयदिहभवतिरागद्वेषदोषप्रसूतिःकतर
दपिपरेषांद्रव्यणांनास्तितत्रस्वयमयमप
राधीतत्रसर्वत्रबोधोभवतुविदितमस्तंयां
त्ववोधोस्मिबोधः॥२०१॥ रथोद्धतारागज
नननिमित्ततांपरद्रव्यमेवकलयंतियेतु
तोऽत्तरंतिनहिमोस्वाहिनींशुद्धबोधविधुरां
धवुद्धयः॥२०२॥ शार्दूलविक्रीडितं पूर्णैकाच्यु
तशुद्धबोधमहिमाबोधोनबोधादयंयामा
त्कामपिविक्रियांनतदितोदीयःप्रकाशएवि
ज्ञप्तिस्तत्स्थितिबोधबंधधिषणाएतेकि
ज्ञानिनोरागद्वेषमयाभवंतिसहजांमुंच
त्युदासीनतां॥२०३॥ रागद्वेषविभावमुक्तम
हसोनित्यंस्वभावंस्पृशःपूर्वागामिसमस्तक

र्म्मविकलानिन्नास्तदालोदयात् दूरारूढ
चरित्रवैभववलाच्चैवच्छिदचिर्मयीविंदंति
स्वरसाभिषिक्तभुवनांज्ञानस्यसंचेतनां
॥२०४॥ इंद्रवज्रा ज्ञानस्यसंचेतनयैवनित्यं
प्रकाशतेज्ञानमतीवशुद्धं अज्ञानसंचेतन
यातुधावन्नबोधस्यशुद्धिंनिरूणद्धिबंधः
॥२०५॥ आर्या कृतकारितानुमननैस्त्रिका
लविषयंमनोवचनकायैः परिहृत्यकर्मस
र्वंपरमंनैःकर्म्यमवलंबे ॥२०६॥ यदहमका
र्षंयदचीकरंयत्कुर्वंतमप्यन्यंसमन्वज्ञा
संमनसाचवाचाकायेनचतन्निष्पादेऽः
कृतमिति ॥२०७॥ मोहाद्यदहमकार्षंसमस्त
कर्म मपिँतत्प्रतिक्रम्य आत्मनिचैतन्यात्मनि
निःकर्मणिनित्यमात्मनावर्त्ते ॥२०८॥ नक
रोमिनकारयामिनकुर्वंतमप्यन्यंसमनुजा

नामिमनसाचवाचाचकायेनचेति ॥२०९॥ आ
र्या मोहविलासविजृंभितमिदमुदयत्कर्म्म
सकलमालोच्य आत्मनिचैतन्यात्मनिनिः
कर्म्मणिनित्यमात्मनावर्त्ते ॥२१०॥ नकरि
ष्यामिनकारयिष्यामिनकुर्वंतमप्यन्यंस
मनुज्ञास्यामिमनसाचवाचाकायेनचेति
॥२११॥ आर्या घृत्वाख्यायनविष्यत्कर्म
समस्तंनिरस्तसंमोहः आत्मनिचैतन्यात्म
निनिःकर्मणिनित्यमात्मनावर्त्ते ॥२१२॥ इंद्र
वज्रा समस्तमित्येवमपास्यकर्मत्रैकालिकं
शुद्धनयावलंबी विलीनमोहोरहितंविका
रैरखिन्नमात्रमात्मानमथावलंबे ॥२१३॥ अथस
कलकर्म्मफलसन्यासभावनांनाट्यति
विगलंतुकर्मविषतरुफलानिममभुक्तिमं
तरेणैव संचेतयेहमचलंचैतन्यात्मानमा

२१७

त्मानं। नाहं मतिज्ञानावरणीयफलं भुंजेचै
तन्यात्मानमात्मानमेवसंचेतये॥२१४॥इत्या
दिप्रकृतिभावसन्यासनं॥वसंततिलका॥
निःशेषकर्मफलसंन्यसनात्समेवं सर्वत्र
यांतरविहारनिवृत्तहृत्तेः॥चैतन्यलक्ष्मजन
तोन्नशमात्मतत्त्वंकालावलीयमचलस्य
वहलनंता॥२१५॥यःपूर्वभावकृतकर्मवि
षफुमाणं भुंक्तेफलानि नखलुस्वतएवतस्य
॥आपातकालरमणीयमुदर्कर म्यंनिःक
र्मशर्ममयमेतिदशांतरंसः॥२१६॥अग्धरा॥
अत्यंतंभावयित्वाविरतिमविरतिंकर्मणस्त
त्फलाच्चप्रस्पष्टंनाटयित्वाप्रलयनमखिल
ज्ञानसंचेतनायाः॥पूर्णंकृत्वास्वभावंस्वरस
परिगतंज्ञानसंचेतनांस्वांसानंदंनाट्यंत
प्रशमरसमितःसर्वकालंपिबंतु॥२१७॥

इतःपदार्थप्रथनावगुंठनाद्विनाकृतेरेकम
नाकुलंज्वलत्समस्तवस्तुव्यतिरिकनिश्च
यादिवेचितंज्ञानमिहावतिष्ठते॥२१८॥शार्दू
लविक्रीडितं॥अन्येभ्योव्यतिरिक्तमात्मनि
यतंविन्यस्यधुवस्तुतामादानोज्झनशून्यमे
तदमलंज्ञानंतथावस्थितं॥मध्याद्यंतवि
भागमुक्तसहजस्फारप्रभाभासुरःशुद्धज्ञा
नघनोयथास्यमहिमानित्योदितस्तिष्ठति
॥२१९॥इंद्रवज्रा॥नुनमुक्तमुन्मोच्यमशेष
तस्तत्त्यदात्मनेःसंहृतसर्वशक्तेः॥तथात
मादेयमशेषतस्तत्पूर्णस्यसंधारणमात्म
नीह॥२२०॥अनुष्टुप्॥अतिरिक्तंपरद्रव्या
देवंज्ञानमवस्थितं॥कथमाहारकंतस्या
धेनदेहोस्यशंक्यते॥२२१॥एवंज्ञानस्यशु
द्धस्यदेहएवनविद्यते ततोदेहमयंज्ञानु

न्नलिंगंमोक्षकारणं॥२२२॥दर्शनज्ञानचा
रित्रत्रयात्मात्मत्वमात्मनः॥एकएवसदा
सेव्योमोक्षमार्गोमुमुक्षुणा॥२२३॥ इहाई
लविक्रीडितंएकोमोक्षपथोयएषनिय
तोदृग्ज्ञप्तिदृत्तात्मकस्तत्रैवस्थितिमेति
यस्तमनिशंध्यायेच्चतंचेतति।तस्मिन्नेव
निरंतरंविहरतिद्रव्यांतराण्यस्पृशन्सो
वश्यंसमयस्यसारमचिरान्नित्योदयंवि
दति॥२२४॥येत्वेनंपरिहृत्यसंरतिपथप्र
स्थापितेनात्मा।नालिंगोद्रव्यमयेवहंतिम
मतांतत्त्वावबोधच्युताः॥नित्योद्योतमखं
डमेकमतुलालोकंस्वभावप्रभाभाग्भारं
समयस्यसारममलंनाद्यापिपश्यंतिते
॥२२५॥विषमपदहतंयद्व्यवहारविमूढ
दृष्टयस्फुरदमलमात्मकिलैतीतिनेतुमनसः

घबोधविमुग्धमुह्यंःकलयंतीहजनास्खुषं
नतंदुलं॥२२६॥स्थोहृताद्रव्यलिंगममका
रमीलितैर्दृश्यतेसमयसारएवनद्रव्यलिं
गमिहयत्किलान्यतोज्ञानमेकमिदमेव
हिस्वतः॥२२७॥मालिनीअलमलमतिजल्पैर्
दुर्विकल्पैरनल्पैरयमिहपरमार्थश्चेत्यतां
नित्यमेकः॥स्वरसविसरपूर्णज्ञानविस्फू
र्तिमात्रान्खलुसमयसाराद्उत्तरंकिंचिद
स्ति॥२२८॥अनुष्टुप्इदमेकंजगच्चक्षु
र्ह्यंयातिपूर्णतां॥विज्ञानघनमानंदमयम
प्रत्नतांनयत्॥२२९॥इतीदमात्मनस्तत्त्वं
ज्ञानमात्रमवस्थितं॥अखंडमेकमचलंस्व
संवेद्यमवाधितं॥२३०॥अत्रसाक्षादमुख्य
र्यंवस्तुतत्त्वमवस्थितिःउपायोपेयभाव
श्चमनागपिचिंत्यते॥२३१॥ इहाई

DR BHAU DAJI

लविक्रीडितं बाह्यार्थैः परिपीतमुज्झितनि
जप्रव्यक्तिरिक्तीनवद्विश्रांतं परस्परमग्न
परितोज्ञानंपरशोःसदिति यत्तत्तत्त दिह
स्वरूपतइतिस्माहादिनस्तत्पुनर्दूरोन्म
ग्नघनस्वभावभरतःपूर्णंसमुन्मज्जति
॥२२२॥ विश्वंज्ञानमितिप्रतर्क्यसकलं दृ
ष्ट्वास्वतत्त्वाशयामूलाविश्वमयःपशुःप
शुरिवस्वछंदमाचेष्टतेयत्तत्परस्परूपतो
नतदितिस्माहाददर्शीपुनः विश्वाद्भिन्न
मविश्वविश्वघटितंतत्स्वतत्त्वंस्पृशेत्
॥२२३॥ बाह्यार्थग्रहणस्वभावभरतोवि
श्वंविचित्रोल्लसत्तेयाकारविशीर्णशु
क्तिरजितत्त्रुटत्पशुर्नरूपतिएकस्वत
याससदावृदितयाज्ञेदन्नमंध्वंसयन्नेकं
नमवाधितमुज्जवलंपश्यंत्यनेकांतविद्

॥२२४॥ज्ञेयाकारकलंकमेचकचितिर्धत्ता
लनंकल्पयनेकाकारचिकीर्षयास्फुट
मविज्ञानंपशुर्नेहतिचैचित्र्येपिविचित्र
तामुपगतंज्ञानंस्वतःक्षालितंपर्यायैस्त
दनेकतांपरिमृज्यात्मपत्यनेकांतवित्
॥२२५॥ प्रत्यक्षालिखितस्फुटस्थिरपरोक्ष्या
स्तितावंचितःस्वोक्षानवलोकनेनपरितः
शून्यःपशुर्नश्यति स्वोक्षास्तितयानिरू
प्यनिपुणंसद्यःसमुन्मज्जतांस्माहादीत्रुवि
श्वोक्षबोधमहसापूर्णेजिनज्जीवति॥२२
६॥ सर्वोक्षमयंपश्यपुरुषंदुर्वासना वा
सितःस्वोक्षमात्रमतःपशुःकिनपरोक्षेषु
विश्राम्यति स्माहादीत्रुसमस्तवस्तुषुपरो
क्षात्मनानास्तितांजातन्निर्मलशुद्धबो
धमहिमास्वोक्षमेवाश्रमेत्॥२२७॥ जिना

क्षेत्रनिमग्नबोधनियतव्यापारनिष्टंसदा
सीदत्येव हि पतंतमभितः पश्यन्पुमां
संपश्यः स्वक्षेत्रास्तितयानिरुद्धरभसः
स्याद्वादवेदी पुनः तिष्ठत्यात्मनिखातवो
धनियतव्यापारशक्तिर्भवन् ॥२३०॥ स्व
क्षेत्रस्थितमेष्टयधिधर क्षेत्रस्थिता
र्थैरनाकुलमेव पश्यः प्रणश्यतिचिदाक ।
रान्सहार्थैर्विभन् स्याद्वादीत्युदसन्स्व
धामनिपरक्षेत्रेविदन्नास्तितांत्यक्तार्थे ।
विनश्यतामनुन्मत्याकारकमीत्यगन्
॥२३१॥ पूर्वालंबितबोधनाशसमयेज्ञान
स्यनाशंविदन्सीदत्येवनकिंचनापिकल
यन्नत्यंतशुद्धः पश्यः अस्तिलंनिजकाल
तोत्पकलयन्स्याद्वादवेदीपुनःपूर्णास्ति
स्वतिवर्णवस्तुषुमुरुर्मूर्च्छाविनश्यत्स्व

पि ॥२४०॥ अर्थालंबनकालएवकलयन्न
ज्ञानस्यसलंबस्त्रैयालंबनलालसेनम
नसान्नाम्पन्पश्युर्नश्यति नास्तिलंपरक
लतोत्पकलयन्स्याद्वादवेदीपुनःतिष्ठ
त्यात्मनिखातनित्यसहजज्ञानैकपुंजीभ
वन् ॥२४१॥ विश्रांतःपरभावभावकलन
न्नित्यंबहिर्वस्तुषुनश्यत्येवपश्युःस्वभा
वमहिम्नेकांतनिश्चेतनःसर्वस्मान्नि
यतस्वभावभवनज्ञानाद्विमुक्तोभवन्सप
श्यादीत्युदनाशमेतिमहजस्पष्टीकृतप्रत्य
यः ॥२४२॥ अध्यास्यात्मनिसर्वभावभव
नंप्रभुःस्वभावच्युतःसर्वत्राप्यनिवारितोय
तनयःस्वैरंपशुक्रीडतिःस्याद्वादीत्युदितप्र
बलसतिस्वस्यस्वभावंभरादास्कंद्यप
रभावभावविरहंभालोकनिःकंपितः

॥२७३॥ प्रादुर्भावविरामसुस्थितवहज्ज्ञानो
ज्ञानात्मनानिर्ज्ञानात्तज्ञप्तेरंगसंगप
तितंचायःपरमुन्नयति स्याद्वादीवुचिद
त्मनापरिमृशंश्चिद्वस्तुनित्योदितंटंको
त्कीर्णघनस्वभावमहिमज्ञानंभवन्जी
वति॥२७४॥टंकोत्कीर्णविशुद्धबोधविस
राकारात्मतत्त्वान्नायावांछत्युज्वलदर्श
चित्परिणतेर्न्निर्न्नंपशुः किंचनाज्ञानंनि
त्यमनित्यतापरिगमेप्यासादयत्युज्वलं
स्याद्वादीतदनित्यतांपरिमृशंश्चिद्वस्तुवृ
त्तिक्रमान्॥२७५॥अनुष्टुप्॥इत्यज्ञानवि
मूढानांज्ञानमात्रंप्रसाधयन्नात्मतत्त्व
मनेकांतःस्वयमेवानुभवति॥२७६॥एवं
तत्त्वव्यवस्थित्यास्वंव्यवस्थापयन्स्वयं
ह्यलंघ्यशासनंजैनमनेकांतोप्यवस्थितः

॥२७७॥वसंततिलका॥इत्याद्यनेकनिजशक्ति
सुनिर्भरोयियोज्ञानमात्रमयतांनजहातिमा
वः॥एवंक्रमाक्रमविवर्त्तिविवर्त्तचित्रंतद्द्रव्यप
र्ययमयंचिदिहास्तेवस्तु॥२७८॥नैकांतसंग
तदृशास्वयमेववस्तुतत्त्वव्यवस्थितिमिति
शविलोकयंतः॥स्याद्वादशुद्धिमधिकामधि
गम्यसंतोज्ञानीभवंतिजिनशक्तिमलंघयं
तः॥२७९॥येज्ञानमात्रनिजभावमयीमकंपां
भूमिंश्रयंतिकथमप्यनीतमोहाःतेसा
क्षकत्वमधिगम्यनयंतिसिद्धमूढास्त्वमूमसु
पलभ्यपरिश्रमंति॥२८०॥स्याद्वादकौशल
सुनिश्चलसंयमाभ्यांयोभावयत्यहरहःस्व
मिहोपयुक्तः॥ज्ञानक्रियानयपरस्परती
व्रमैत्रीपात्रीकृतःश्रयतिभूमिमिमांसएकः
॥२८१॥चिंतिंडंडिमविलासिविकासहा

सः शुद्धचकाशानरनिर्भरसुधमातः त्मानं
द सुस्थितसदास्खलितैकरूपःतस्यैव
चायमुदयत्यचलार्चिरात्मा॥२५२॥स्याद्व
ददीपितसलन्महसिप्रकाशोशुद्धस्वभा
वमहिमन्युदितेमयीति किंबंधमोक्षपथ
पातिनिरूपणावैनिरूपोदयःपरमयंस्फु
रतुस्वभावः॥२५३॥चित्रात्मशक्तिसमुदा
यमयेयमात्मासद्यःप्रणश्यतिनयेक्षण
खंडनमानःतस्मादखंडमनिराकृतखंड
मेकमेकांतशांतमचलंचिदहंमहोस्मि॥२
५४॥नाद्व्येणखंडयामिनद्वैतेनखंडया
मिनकालेनखंडयामिनभावेनखंडयामि
शुविशुद्धएकोज्ञानमात्रोभावोस्मि॥२५
शालिनीयोयंभावोज्ञानमात्रोहमस्मिज्ञेयो
ज्ञेयज्ञानमात्रःसनैवज्ञेयोज्ञेयज्ञानकल्पै॥२५

लवलान्नज्ञानज्ञेमज्ञातृमद्धस्कमात्रः॥२५६
एथीक्कचिच्चसतिमेचकंक्कचिन्मेचकामे
चकंक्कचित्पुनरमेचकंसहजमेवतत्त्वंमम
॥तथापिनविमोहंत्यमनमेधसांतन्मनः
परस्परसुसंहतप्रकटशक्तिचक्रंस्फुरत्
॥२५७॥इतोगतमनेकतांदधदितःसशाप्ये
कतांमितःक्षणविभंगुरंध्रुवमितःसदैवोद
यात्इतःपरमविस्तृतंधृतमितःप्रदेशै
र्निजैरहोसहजमात्मनःतदिदमद्भुतंवैभ
वं॥२५८॥कषायकलिरेकतःस्खलतिशां
तिरस्त्येकतोन्नयोप्यहतिरेकतःस्पृशतिमु
क्तिरप्येकतःजगत्त्रितयमेकतःस्फुरति
चिच्चकास्त्येकतःस्वभावमहिमात्मनोवि
जयतेद्भुतादद्भुतः॥२५९॥मालेनीजयतिसह
जतेजःपुंजमज्जत्त्रिलोकीस्खलदखिलवि

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

कल्पोप्येकएवस्वरूपः स्वरसविसरपूर्ण
ाच्छिन्नतत्त्वोपलंभः प्रसभनियमितार्चि
श्चिच्चिन्मात्रैकाग्र्यलक्षणः॥२६०॥ज्ञप्तिर्विचलिन
चिदात्मन्यात्मनात्मानमात्मन्यनवरत
मेमग्नंधारयन्ध्वस्तमोहंनुदितमम्य
चंडज्योतिरेतत्समंतात्प्रज्वलत्सुविमल
पूर्णनिःसपत्नस्वभावं॥२६१॥शार्दूलवि
क्रीडितंयस्माद्वैतमनूत्पुरास्वपरयोर्भेदं
यतोंतरंरागद्वेषपरिग्रहेसतियतो
जातंक्रियाकारकंजुंजानाचयतोनुभूति
रखिलंखिलंक्रियायाःफलंतद्विज्ञान्य
नोघमग्नमधुनाकिंचिन्नकिंचिक्रिया॥२
६२॥इंद्रवज्रास्वशक्तिसंसूचितवस्तुतत्त्वै
र्व्याख्याकृतेयंसमयस्यशब्दैःस्वरूपगु
प्तस्यकिंचिदस्तिकर्त्तव्यमेवामृतचंद्रसूरेः

॥२६३॥इतिश्रीकुंदकुंदाचार्यविरचितसम
यसारप्राभृततात्पर्यसाम्रामृतचंद्राचार्यविर
चितसमाप्तमिदं॥कुंदकुंदेणमुणिणागाहाकया
समयसारसङ्गस्सरइयाकलसाएएणंअ
मयंचंदेणसूरिहिंलिखितमिदंमाणिक्य
चंदेणस्वामिपवग्नार्थंफाल्गुनशुक्ल
दशम्यांचंद्रवासरेसंवत्सर१६७२का
शुनंभवतुपंडकपाठकयोः कल्याणम
मिच्छेत्तंअविरमणंकसायजोगायं
आसवाहोंति पणवासपणवीसा
पण्णरसाहोंतितेत्रेया १
ॐह्रीं क्रौं क्रिं क्रुं क्रूं क्रैं क्रौं क्रौं क्रः
असिआउसासम्यग्दर्शनज्ञा
नचारित्रेभ्योनमः सर्वविद्या
निधिलाभंकुरुकुरुस्वाहा॥